# A

**24128** **120 MINUTES**

1. एतेषु प्रस्थानत्रये अन्तर्भूतं किम् ?
   A) पुराणानि B) सांख्यम् C) ब्रह्मसूत्रम् D) वेदाङ्गानि

2. ....... अवस्त्वारोपः अध्यारोपः।
   A) वस्तुनि B) विभवे C) अलिङ्गे D) अभावे

3. कर्मेन्द्रियाणि कति ?
   A) दश B) नव C) द्वादश D) पञ्च

4. धर्मजिज्ञासावादिनः के ?
   A) नैयायिकाः B) वैशेषिकाः C) सांख्याः D) मीमांसकाः

5. विनाशाय च ......... संभवामि युगे युगे।
   A) दुष्कृताम् B) विज्ञानाम् C) मुनीनाम् D) राज्ञाम्

6. संभावितस्य चाकीर्तिः .......... अतिरिच्यते।
   A) जननात् B) वरणात् C) दारिद्र्यात् D) मरणात्

7. ........... कर्मसु कौशलम् ।
   A) योगः B) विद्या C) नयः D) वृत्तिः

8. ........ निधनं श्रेयः परधर्मो भयावहः।
   A) विज्ञाने B) आचारे C) स्वधर्मे D) मार्गे

9. भगवद्गीतायां शिष्यस्तेहं शाधि मां त्वां प्रपन्नम् इति केन उक्तम् ?
   A) अर्जुनेन B) कृष्णेन C) सञ्जयेन D) जनमेजयेन

10. पञ्चतन्त्रेषु प्रथमः तन्त्रभागः कः?
    A) लब्धप्रणाशः B) काकोलूकीयम् C) मित्रलाभः D) मित्रभेदः

11. अमरसिंहकृते नामलिङ्गानुशासने कति काण्डानि सन्ति ?

A) दश B) अष्टादश C) विंशति D) त्रीणि

12. भागवतपुराणे कति स्कन्धाः सन्ति ?

A) दश B) द्वादश C) विंशति D) सहस्रम्

13. कस्मिन् ग्रन्थे काव्यगतदोषाणां विस्तरेण उपन्यासः विद्यते ?

A) दशरूपके B) ध्वन्यालोके C) नाट्यशास्त्रे D) कव्यप्रकाशे

14. श्रीपादसप्ततिः इति स्तोत्रकाव्यस्य कर्ता कः?

A) शङ्करः B) नारायणभट्टः C) कुलशेखरः D) विल्वमङ्गलम्

15. अधोनिर्दिष्टेषु वररुचिना कृतः ग्रन्थः ?

A) अष्टाध्यायी B) वार्तिकम्

C) महाभाष्यम् D) लघुसिद्धान्तकौमुदी

16. या सृष्टिः स्रष्टुराद्या वहति विधिहु तंया हविर्या च होत्री ... इत्यत्र वृत्तं किम् ?

A) गीतिः B) मालिनी C) स्रग्धरा D) मन्दाक्रान्ता

17. ऋग्वेदे कति मण्डलानि सन्ति ?

A) सप्त B) अष्टौ C) दश D) नव

18. जनासः इति प्रयोगः कुत्र दृश्यते ?

A) रघुवंशे B) ऋग्वेदे

C) नैषधीयचरिते D) माघकाव्ये

19. राजतरङ्गिणी इति इतिहासकाव्यस्य कर्ता कः?

A) कल्हणः B) बिल्हणः C) जल्हणः D) अतुलः

20. धनञ्जयेन रचितः नाट्यशास्त्रग्रन्थः कः?

A) काव्यानुशासनम् B) शृङ्गारप्रकाशः

C) दशरूपकम् D) एकावली

21. कस्मिन्नुपनिषदि यमनचिकेतसोः वृत्तान्तमुपवर्णितम् ?

A) कठोपनिषदि B) केनोपनिषदि

C) तैत्तिरीये D) ईशावास्योपनिषदि

22. यथोचितं योजयत-

a. भवभूतिः 1. ऊरुभङ्गम्

b. दण्डी 2. किरातार्जुनीयम्

c. भासः 3.दशकुमारचरितम्

d. भारविः 4.उत्तररामचरितम्

A) a-1, b-2, c-3, d-4 B) a-4, b-3, c-1, d-2
C) a-2, b-3, c-4, d-1 D) a-3, b-2, c-4, d-1

23. यथोचितं योजयत-

a. कुमरिलभट्टः 1. सांख्यकारिका

b. बुद्धः 2.श्लोकवार्तिकम्

c. ईश्वरकृष्णः 3. किरणावली

d. उदयनः 4. आर्यसत्यानि

A) a-1, b-2, c-3, d-4 B) a-4, b-3, c-1, d-2
C) a-2, b-4, c-1, d-3 D) a-3, b-2, c-4, d-1

24. यथोचितं योजयत-

a. मध्यमव्यायोगः 1. भवभूतिः

b. उत्तररामचरितम् 2. कुलशेखरः

c. मुद्राराक्षसम् 3. भासः

d. सुभद्राधनञ्जयम् 4. विशाखदत्तः

A) a-1, b-2, c-3, d-4 B) a-2, b-4, c-1, d-3
C) a-2, b-1, c-4, d-3 D) a-3, b-1, c-4, d-2

25. शिशुपालवधमहाकाव्ये कति सर्गाः सन्ति ?

A) शतम् B) द्वाविंशति C) विंशति D) अष्टादश

26. अन्विताभिधानवादिनः के?

A) भाट्टमीमांसकाः B) प्राभाकराः

C) वेदान्तिनः D) चार्वकाः

27. ऋग्वेदे प्राधान्येन उपवर्णिता देवता कः?

A) इन्द्रः B) रुद्रः C) सविता D) विष्णुः

28. महावीरचरित नाटकस्य कर्ता कः?

A) शूद्रकः B) भासः C) कालिदासः D) भवभूतिः

29. शिवानन्दलहरी इति स्तोत्रकाव्यस्य कर्ता कः?

A) मेल्पुत्तूर नारायणभट्टः B) शङ्करः

C) कृष्णलीलाशुकः D) कालिदासः

30. पञ्चतन्त्रे तृतीयं तन्त्रं किम् ?

A) काकोलूकीयम् B) अपरीक्षितकारकम्

C) मित्रभेदः D) लब्धप्रणाशः

31. भुजङ्गप्रयातवृत्ते कः गणः प्रयुज्यते ?

A) भगणः B) सगणः C) मगणः D) यगणः

32. वदन्ति वर्ण्यावर्ण्यानां धर्मैक्यं .............. बुधाः।

A) दीपकम् B) अनन्वयः C) व्यतिरेकः D) दृष्टान्तः

33. मलयालभाषा कस्मिन् भाषागोत्रे अन्तर्भवति ?

A) केल्टिक् B) द्राविड C) आर्य D) चैनीस्

34. वैदिकमन्त्रेषु गायत्रीमन्त्रे वर्णिता देवता का ?

A) इन्द्रः B) सविता C) वरुणः D) रुद्रः

35. अनुष्ठानप्रधानः वेदः कः?

A) सामवेदः B) अथर्ववेदः C) नाट्यवेदः D) यजुर्वेदः

36. एतेषु अर्थसङ्कोचस्य उदाहरणं किम् ?

A) कुठारः B) पिता C) पङ्कजम् D) नीडः

37. जश् प्रत्याहारे अन्तर्भूताः वर्णाः के ?

A) इ उ ऋ लृ B) क ख ग घ C) ज ब ग ड द D) ह र ल प

38. रघुवंशानुसारेण अजस्य राज्ञः पत्नी का ?

A) सुमित्रा B) सुदक्षिणा C) कौसल्या D) इन्दुमती

39. रात्रिसूक्तम् कस्मिन् वेदे वर्तते ?

A) सामवेदे B) यजुर्वेदे C) ऋग्वेदे D) अथर्ववेदे

40. अधोनिर्दिष्टेषु कुलशेखरेण रचितं स्तोत्रं किम् ?

A) श्रीकृष्णकर्णामृतम् B) नारायणीयम्

C) सौन्दर्यलहरी D) मुकुन्दमाला

41. अग्निमित्रः कालिदासस्य कस्मिन् नाटके नायकः भवति ?

A) मालविकाग्निमित्रे B) ऊरुभङ्गे

C) शाकुन्तले D) विक्रमोर्वशीये

42. शृङ्गारप्रकाशः इति ग्रन्थस्य कर्ता कः?

A) बिल्हणः B) भोजः C) मुकुलभट्टः D) धनिकः

43. विलापवर्णने संस्कृतकाव्येषु प्रायेण स्वीकृतं वृत्तं किम् ?

A) हरिणी B) वियोगिनी C) मन्दाक्रान्ता D) शालिनी

44. समर्थनीयस्यार्थस्य .......... समर्थनम् ।

A) व्यतिरेकः B) अनुमानम्

C) काव्यलिङ्गम् D) दीपकम्

45. चक्रपाणिः इत्यत्र कः समासः?

A) अव्ययीभावः B) तत्पुरुषः C) कर्मधारयः D) बहुव्रीहिः

46. कुमारसंभवकाव्यानुसारेण मैनाको नाम कः?

A) कश्चन पक्षी B) देवता C) राजा D) पार्वत्याः सहोदरः

47. वैदिकपदार्थचिन्तने प्रसिद्धस्य निरुक्तस्य कर्ता कः?

A) पाणिनिः B) कात्यायनः C) यास्कः D) हरदत्तः

48. कृष्ण अम् इति स्थिते केन सूत्रेण कृष्णम् इति पूर्वरूपसिद्धिः?

A) आडजादीनाम् B) अजादिभ्यष्टाप्

C) अमि पूर्वः D) तस्यैकवचनम्

49. साधकतमं कारकं किम् ?

A) करणम् B) सम्प्रदानम् C) अपादानम् D) कर्म

50. अपाये ध्रुवं कारकं किम् ?

A) आधारः B) करणम् C) अपादानम् D) ईप्सिततमम्

51. आधारार्थाः कति ?

A) द्वौ B) पञ्च C) षट् D) त्रयः

52. तर्किकमते कति गुणाः सन्ति ?

A) दश B) चतुर्विंशति C) द्वादश D) अष्टादश

53. असाधारणं कारणम् ................।

A) करणम् B) परामर्शः C) अनुमानम् D) कार्यम्

54. ज्ञानाकरणकं ज्ञानं नाम किम् ?

A) अनुमानम् B) प्रत्यक्षम् C) शाब्दम् D) संशयः

55. द्रव्यं तार्किकमते कतिविधम् ?

A) दशविधम् B) नवविधम् C) चतुर्विधम् D) पञ्चविधम्

56. नित्यमेकमनेकानुगतं ................।

A) द्रव्यम् B) मिथ्या C) गुणः D) सामान्यम्

57. भाषापरिच्छेदाख्यः न्यायसिद्धान्तमुक्तावली केन रचिता ?

A) अन्नंभट्टेन B) विश्वनाथन्यायपञ्चाननेन

C) उदयनेन D) जयन्तभट्टेन

58. तार्किकमते प्रमाणानि ........ ।

A) चत्वारि B) त्रीणि C) अष्टौ D) पञ्च

59. स्मृतिव्यतिरिक्तं ज्ञानम् .........।

A) अनुभवः B) स्मरणम्

C) अर्थक्रियाकारित्वम् D) विज्ञानम्

60. उपादानकारणस्य नामान्तरं किम् ?

A) समवायि B) निमित्तम्

C) अन्यथासिद्धम् D) असमवायि

61. तार्किकमतेन अभावस्य ......... भेदाः सन्ति।

A) दश B) चत्वारः C) पञ्च D) षट्

62. वेदान्तसारो नाम वेदान्तग्रन्थः केन रचितः?

A) धर्मराजेन B) श्रीशङ्करेण C) सदानन्देन D) भास्करेण

63. अथातो ब्रह्मजिज्ञासा इति कस्मिन् ग्रन्थे उक्तः?

A) मीमांसासूत्रे B) ब्रह्मसूत्रे

C) न्यायसूत्रे D) रससूत्रे

64. वेदान्तानुसारेण अस्य जगतः जन्मादिः कस्मात् भवति ?

A) असतः B) ब्रह्मणः C) ईश्वरात् D) मायातः

65. माया एव सामान्यतः .... इति गीयते।

A) अधर्मः B) अध्यासः C) प्रकृतिः D) परा विद्या

66. विवर्तवादः इति केषां मतम् ?

A) तार्किकानाम् B) प्राभाकराणाम्

C) वेदान्तिनाम् D) चार्वाकानाम्

67. ब्रह्मसूत्रेषु कति पादाः(अध्यायाः) सन्ति ?

A) पञ्च  B) षट्  C) चत्वारः  D) सप्त

68. मीमांसासूत्रग्रन्थस्य कर्ता कः?

A) जैमिनिः  B) पतञ्जलिः  C) भास्करः  D) ब्रह्मा

69. भगवतः परमेश्वरस्य श्वश्रूः का ?

A) सती  B) उमा  C) दुर्गा  D) मेना

70. श्रीहर्षप्रणीतं महाकाव्यं किम् ?

A) रावणवधः  B) नैषधीयचरितम्

C) राघवीयम्  D) वासवदत्ता

71. ........... मुख्यसम्बन्धस्तात्पर्यानुपपत्तितः।

A) अभिधा  B) लक्षणा  C) तात्पर्यम्  D) व्यञ्जना

72. अत्यन्ततिरस्कृतवाच्यध्वनिः कस्मिन् ध्वनिभेदे अन्तर्भवति ?

A) अभिधामूलध्वनौ  B) रसध्वनौ

C) लक्षणामूलध्वनौ  D) रसवदलङ्कारे

73. वक्रोक्तिकारेण कुन्तकेन कति काव्यमार्गाः निर्दिष्टाः?

A) पञ्च  B) षट्  C) सप्त  D) त्रयः

74. रसमयेषु काव्येषु ध्वन्यालोके केषां अपृथग्यत्ननिर्वर्त्यत्वमपेक्षितम् ?

A) गुणानाम्  B) दोषाणाम्

C) अलङ्काराणाम्  D) यमकादेः

75. मम्मटभट्टमते लक्षणा कतिविधा ?

A) त्रिधा  B) षड्विधा  C) अष्टधा  D) दशधा

76. काव्यप्रकाशानुसारेण गुणाः कति ?

A) दश  B) त्रयः  C) विंशति  D) सप्त

77. रसव्याख्याने साधारणीकरणं केन समर्थितम् ?

A) भट्टलोल्लटेन B) श्रीशङ्कुकेन

C) भट्टनायकेन D) धनिकेन

78. रससूत्रव्याख्याने अभिव्यक्तिवादस्य वक्ता कः?

A) अभिनवगुप्तः B) मुकुलभट्टः

C) भट्टलोल्लटः D) भट्टनायकः

79. स्वप्नवासवदत्ते नाटके पञ्चमः अङ्कःकेन नाम्ना व्यवह्रियते ?

A) पर्णशालाङ्कः B) स्वप्नाङ्कः

C) मायासीताङ्कः D) शूर्पणखाङ्कः

80. आश्चर्यचूडामणिनाटके कति अङ्काः सन्ति ?

A) सप्त B) अष्टौ C) षट् D) पञ्च

81. ऐतिह्यानुसारं शङ्करेण परामृष्टः भुवनभूतिःकः?

A) कुलशेखरः B) शक्तिभद्रः C) भवभूतिः D) श्रीकण्ठः

82. अभिज्ञानशाकुन्तलनाटके दुष्यन्तस्य विदूषकः कः?

A) माडव्यः B) वसन्तकः C) मैत्रेयः D) सोमरातः

83. शकुन्तलायाः पुत्रस्य नाम किम् ?

A) ताम्रपर्णः B) शार्ङ्गरवः C) सर्वदमनः D) अजामिलः

84. कण्वमुनेः द्वौ शिष्यौ कौ ?

A) चैत्रमैत्रेयौ B) शार्ङ्गरवशारद्वतौ

C) अनसूयाप्रियंवदे D) तमसामुरले

85. घोषवती नाम कस्य वीणा ?

A) चारुदत्तस्य B) कालिदासस्य C) उदयनस्य D) शङ्करस्य

86. चक्रारपङ्क्तिरिव गच्छति भाग्यपङ्क्तिः इति कस्मिन् ग्रन्थे निर्दिष्टम् ?

A) मालतीमाधवे B) शाकुन्तले

C) स्वप्नवासवदत्ते D) मुद्राराक्षसे

87. परिहासविजल्पितं सखे परमार्थेन न गृह्यतां वचः। कस्येदं वचनम् ?

A) उदयनस्य B) दुष्यन्तस्य

C) यौगन्धरायणस्य D) वसन्तकस्य

88. बृहज्जातकस्य मङ्गलश्लोके वर्णितः देवः कः?

A) विष्णुः B) सुब्रह्मण्यः C) चन्द्रः D) रविः

89. युष्मच्छब्दस्य पञ्चमी एकवचनम् किम् ?

A) त्वया B) युवाम् C) त्वत् D) युष्माकम्

90. कृञ् धातोः लटिआत्मनेपदि प्रथमाबहु वचनम्किम् ?

A) कुर्वन्ति B) कुर्वन्ते C) कुर्वते D) कुरुते

91. पस्पशाह्निकं महाभाष्यस्य ..............भवति।

A) प्रथमाध्यायः B) द्वितीयाध्यायः

C) चतुर्थाध्यायः D) अन्तिमाध्यायः

92. वेदान्तपरिभाषा केन रचिता ?

A) धर्मराजाध्वरीन्द्रेण B) श्रीशङ्करेण

C) सदानन्देन D) भास्करेण

93. अथातो ब्रह्मजिज्ञासा इति सूत्रे अथ शब्दस्य अर्थः कः?

A) मङ्गलः B) समाप्तिः C) आनन्तर्यः D) जिज्ञासा

94. वेदान्तसूत्रं केन प्रणीतम् ?

A) शङ्करेण B) जैमिनिना C) बादरायणेन D) श्रीरामानुजेन

95. अतस्मिन् तद्बुद्धिरिति कस्य लक्षणम् ?

A) अधर्मस्य B) अध्यासस्य C) प्रकृतेः D) पराविद्यायाः

96. आरम्भवादस्य प्रयोक्तारः के ?

A) तार्किकाः B) प्राभाकराः C) वेदान्तिनः D) शैवाः

97. ब्रह्मसूत्रग्रन्थे सूत्रेषु परामृष्टो भवति अयमाचार्यः?

A) जैमिनिः B) शङ्करः C) पाणिनिः D) वामनः

98. ब्रह्मसूत्रस्य अद्वैतपरव्याख्याकारः कः?

A) भास्करः B) बादरायणः C) शङ्करः D) कपिलः

99. यमनचिकेतस्संवादे यमेन नचिकेतसे कति वराः दत्ताः?

A) द्वौ B) त्रयः C) चत्वारः D) पञ्च

100. धीसन्तानकारकः ग्रहः कः?

A) भौमः B) बुधः C) चन्द्रः D) गुरुः

101. वराहमिहिराचार्यस्य होराशास्त्रस्य नामान्तरं किम् ?

A) जातकपारिजातम् B) जातकादेशः

C) बृहज्जातकम् D) मुहूर्त्तपदवी

102. मेषः कस्य उच्चराशिः भवति ?

A) कुजस्य B) शुक्रस्य C) शनेः D) सूर्यस्य

103. ज्योतिषे सौम्यः इति पदेन कः ज्ञायते ?

A) रविः B) कुजः C) शुक्रः D) बुधः

104. शनैश्चरस्य स्वक्षेत्रे के ?

A) मेषकीटौ B) सिंहकुलीरौ C) वृषतुले D) मृगकुम्भौ

105. एतासु रिक्ता तिथी का ?

A) प्रथमा B) तृतीया C) चतुर्थी D) षष्ठी

106. गृहप्रवेशे अशुभौ वारौ कौ ?

A) मन्दसितयोः B) अर्कारयोः C) बुधचन्द्रयोः D) गुरुमन्दयोः

107. कृष्णाष्टमीतिथी कस्मिन् कर्मणि शोभना भवति ?

A) विवाहे B) उपनयने C) अन्नप्राशे D) नामकरणे

108. ग्रहेषु कः अन्यं कमपि ग्रहं शत्रुभावेन न गणयति ?

A) बुधः B) चन्द्रः C) गुरुः D) कुजः

109. कुलीरराशेः अधिपः कः?

A) चन्द्रः B) गुरुः C) रविः D) बृहस्पतिः

110. सारावत्याः कर्ता कः?

A) वराहमिहिरः B) श्रीपतिः C) कल्याणवर्मा D) भास्करः

111. सिद्धान्तशिरोमणिः नाम ग्रन्थस्य कर्ता कः?

A) भास्करःद्वितीयः B) लल्लः

C) आर्यभटः D) वराहमिहिरः

112. एतेषु आर्यभटीयस्य केरलीयव्याख्याकारः कः?

A) जयन्तभट्टः B) परमेश्वरः C) कल्याणवर्मा D) ब्रह्मगुप्तः

113. आर्यभटीयस्य प्रथमपादस्य नाम किम् ?

A) कालपादम् B) गोलपादम्

C) गीतिकापादम् D) कालक्रियापादम्

114. आर्यभटीये....... पादाः सन्ति।

A) पञ्च B) अष्टौ C) चत्वारः D) दश

115. मध्वरिः इत्यत्र केन सूत्रेण सन्धिकार्यः?

A) एचोयवायावः B) उरण् रपरः

C) इको यणचि D) अकः सवर्णे दीर्घः

116. शरेण इत्यत्र केन सूत्रेण नकारस्य णत्वम् ?

A) रेफः परस्य B) रषाभ्यां नो णः समानपदे

C) शात् D) अचोन्त्यादि टि।

117. सप्तर्षयः इत्यत्र कः समासः?

A) बहु व्रीहिः B) अव्ययीभावः C) षष्ठीतत्पुरुषः D) द्विगुः

118. विरमते इत्यत्र कस्मात् सूत्रात् आत्मनेपदम् ?

A) विपराभ्यां जेः
B) व्याङ्परिभ्यो रमः
C) अनुपसर्गात्
D) कर्तरि कर्मव्यतिहारे

119. पितृशब्दस्य सम्बोधनप्रथमैकवचने रूपम् ?

A) पिता
B) पिते
C) पितः
D) पितौ

120. सखिशब्दस्य पुल्लिङ्गे प्रथमाबहु वचनम्।

A) सख्यः
B) सखायः
C) सखयः
D) सखाः